# पाठ-२६(अ)
# समसामयिकं संस्कृतसाहित्यम्

**सारान्शः**

भारतस्य प्रतिष्ठे द्वे संस्कृतं चैव संस्कृतिः। साहित्यं समाजस्य प्रतिबिम्बं भवति। संस्कृतभाषा शाश्वती भाषा अस्ति । अतः अस्यां सर्वदा एव साहित्यरचना अभवत्, भवति, भविष्यति च।
संस्कृतसाहित्यभागीरथी अविच्छिन्नरूपेण सततं वहति । यथा प्राचीनकाले साहित्यरचना अभवत् तथैव वर्तमानकालेऽपि संस्कृतसाहित्यस्य ग्रन्थानां रचना क्रियते । सम्पूर्णे भारते कवयः संस्कृतसाहित्यनिर्माणे संलग्नाः सन्ति । गद्यं, पद्यं, रूपकं, सर्वेषु एव साहित्यरचना उपलभ्यते। संस्कृतम् अखिलभारतीयभाषा। यत् साहित्यं वर्तमानकाले लिख्यते तत् समसामयिकं साहित्यं कथ्यते।अस्मिन् साहित्ये महाकाव्यानि, खण्डकाव्यानि, गद्यकाव्यानि, कथाः नाटकादीनि मुक्तककाव्यानि सर्वाणि एव काव्यानि लिखितानि सन्ति। काश्चन नूतनाः प्रवृत्तयः अपि संस्कृतसाहित्ये आगताः यथा एकांकिनाटकानि, मुक्तककाव्यानि, सूडोकविता, हाइकोकविताः इत्यादयः ।

**आवश्यकोऽयं ज्ञानम्**

- संस्कृतं शाश्वती भाषा अस्ति ।
- संस्कृतभाषायाम् अविच्छिन्नरूपेण साहित्यं रचितम् वर्तते ।
- वर्तमानकाले लिखितं लिख्यमानं च साहित्यं समसामयिकसाहित्यम् इति उच्यते ।
- समसामयिके संस्कृतसाहित्ये परः शतानि महाकाव्यानि लिखितानि सन्ति ।
- प्राचीनाः परम्पराः संरक्षिताः नूतनाः च प्रवृत्तयः अपि स्वीकृताः ।
- खण्डकाव्यानि, मुक्तककाव्यानि, दूतकाव्यानि, शतककाव्यानि आधुनिककविभिः अपि लिखितानि ।
- कविभिः यात्राकाव्यानि गीतिकाव्यानि पत्रकाव्यानि अपि लिखितानि।
- समसामयिके संस्कृतसाहित्ये नाटकानि एकांकिनाटकानि नाटककारैः लिखितानि।
- गद्यसाहित्ये उपन्यासाः कथासंग्रहाः च प्रकाशिताः सन्ति ।
- अन्याभ्यः भारतीयभाषाभ्यः विदेशीभाषाभ्यः विशिष्टसाहित्यस्य संस्कृतभाषायाम् अनुवादः अनुलेखनं च कृतम् अस्ति।
- गद्यपद्यमिश्रितानि चम्पूकाव्यानि अपि कविभिः लिख्यन्ते ।
- संस्कृतभाषायां वर्तमानकाले विविधाः पत्रपत्रिकाः प्रकाश्यन्ते ।

**योग्यतां वर्धयत**

- **मुक्तककाव्यानि -** कवयः भावानां प्राबल्यं, लयप्राधान्यम् मनसि कृत्वा काव्यानि रचयन्ति। तानि मुक्तछंदांसि कथ्यन्ते । मुक्तककाव्येषु प्रत्येकं पद्यं स्वतंत्रं भवति ।
- **एकाङ्कीनाटकानि -** एतेषु नाटकेषु एकः एव अङ्कः भवति तत्र विविधानि दृश्यानि भवन्ति ।
- **महाकाव्यानि -** सर्गबद्धं दीर्घकथावृत्तं चरित्रं वा विषयीकृत्य कविना लिखितं महाकाव्यं भवति ।
- **खण्डकाव्यानि-** कथायाः एकं प्रसंगं खण्डं वा विषयीकृत्य रचितं काव्यं खण्डकाव्यं कथ्यते।
- **यात्राकाव्यानि -** येषु काव्येषु यात्रायाः वर्णनं भवति तानि यात्राकाव्यानि उच्यन्ते ।
- **पत्रकाव्यानि -** छन्दोबद्धानि पत्राणि येषु काव्येषु संकलितानि क्रियन्ते तानि पत्रकाव्यानि उच्यन्ते ।
- **शतककाव्यानि -** शतककाव्येषु प्रायः शतम् पद्यानि भवन्ति।
- **दूतकाव्यानि -** दूतकाव्ये दूतद्वारा कश्चन सन्देशः प्रेष्यते । मेघदूते मेघः एव दूतः तत्र विरहपीडितः यक्षः दूतेन मेघेन स्वप्रियतमां प्रति सन्देशं प्रेषयति ।
- **सूडोकाव्यम् -** सूडोकवितायां द्वे वा तिस्रः एव पंक्तयः भवन्ति । हर्षदेवमाधवः सूडोकवितानां क्षेत्रे प्रयोगम् अकरोत् ।
- **चम्पूकाव्य -**गद्यपद्यमयं काव्यं 'चम्पूः' इति कथ्यते ।

- **अनूदितसाहित्यम् -** अन्यासु भाषासु लिखितानां सहित्यानां अनुवादितं रूपम् एव अनूदितसाहित्यम् इति उच्यते।
- **पत्रपत्रिकाः -** भाषायाः समसामयिकसाहित्यं पूर्व पत्रिकासु एव प्रकाश्यते। पत्रिकानां प्रकाशनं दैनिक, मासिक,वार्षिक रूपेण भवति।

**अधिकाङ्कानाम् अर्जनं कथं भवेत् ।**

- पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात् ।
- अधिकाधिक अध्याये संदर्भित विषयाणां अध्ययनं कर्तव्यम्।

**स्व मूल्याङ्कनम् कुरुत**

- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- अध्याये आगतानां व्याकरण बिन्दुनां अभ्यासं कुरुत ।
- मूल पाठस्य अभ्यासं कुरुत।